DITTO WS

Reg. No. : ......................................

Name : ...........................................

# FY-310

**FIRST YEAR HIGHER SECONDARY MODEL EXAMINATION – 2021**

Part – II

**SANSKRIT**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 20 Minutes

*निर्देशा :*

- 20 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।

*നിർദ്ദേശങ്ങൾ:*

- 20 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ളവ തിരഞ്ഞെടുക്കാനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

DITTO WS

I. 1-8 प्रश्नानामुत्तराणि कोष्ठकात् चित्वा लिखत । एकैकस्य एकोऽङ्कः ।

1 മുതൽ 8 വരെയുള്ള ചോദ്യങ്ങൾക്ക് ഉത്തരം ബ്രാക്കറ്റിൽ നിന്നും തിരഞ്ഞെടുത്തെഴുതുക. 1 സ്കോർ വീതം. (8 × 1 = 8)

(1) 'आरम्भगुर्वी क्षयिणी क्रमेण । कस्य मैत्री ?

(खलस्य, साधोः, मृगस्य)

(2) के विघ्नविहताः विरमन्ति ?

(मध्याः, नीचाः, बुद्धिमन्तः)

(3) आदिकविः कः ?

(कालिदासः, व्यासः, वाल्मीकिः)

(4) वाल्मीकिः कुत्र वासम् आरभत ?

(यमुनातीरे, तमसातीरे, गंगातीरे)

(5) "चिन्ताविष्टयाय सीता" इति काव्यस्य कर्ता कः ?

(उल्लूर, वल्लत्तोल्, कुमारनाशान्)

(6) 'सीताविचारलहरी' इति ग्रन्थस्य मूलग्रन्थः कः ?

(चिन्ताविष्टयाय सीता, उमाकेरलम्, कुमारसम्भवम्)

(7) अष्टाङ्गहृदस्य कर्ता कः ?

(सुश्रुतः, चरकः, वाग्भटः)

(8) आयुर्वेदशास्त्रानुसारं शिरसः परिषेकः केन जलेन कर्तव्यः ?

(उष्णजलेन, शीतजलेन, कवोष्णजलेन)

**II. 9-10 प्रश्नयोः पेटिकातः अक्षराण्युपयुज्य अर्थपूर्णं पदं लिखत । एकैकस्य एकैकोऽङ्कः ।**

**9 മുതൽ 10 വരെ ചോദ്യങ്ങൾക്ക് പേടിക (ബോക്സിൽ)യിൽ നൽകിയിട്ടുള്ള അക്ഷരങ്ങൾ ഉപയോഗിച്ച് അർത്ഥ പൂർണങ്ങളായ പദങ്ങൾ എഴുതുക. 1 സ്കോർ വീതം.** **(2 × 1 = 2)**

| रु, पु, प, य |
|---|

(9) नीतिनि _ णाः ।

(10) _ थेष्टम्

**III. 11-12 प्रश्नान् उदाहरणानुसारं परिवर्तयत । एकैकस्य द्वौ अङ्कौ । अस्य विभागस्य अधिकाधिकं द्वौ अङ्कौ ।**

**11 മുതൽ 12 വരെ ചോദ്യങ്ങൾക്ക് തന്നിരിക്കുന്ന ഉദാഹരണത്തിനനുസരിച്ച് മാറ്റിയെഴുതുക. 2 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ നിന്ന് പരമാവധി ലഭിക്കാവുന്ന സ്കോർ 2.** **(2 × 1 = 2)**

(11) उदा. – मातेव – माता + इव ।

(क) छायेव – __________ ।

(ख) लतेव __________ ।

(12) उदा. – पठन् + अपि – पठन्नपि ।

(क) खादन् + अपि – __________ ।

(ख) गच्छन् + अपि __________ ।

**IV. 13-20 प्रश्नानां निर्देशानुसारं उत्तरं लिखत । एकैकस्य त्रयोऽङ्काः । अस्य विभागस्य अधिकाधिकं द्वादशोऽङ्काः ।**

**13 മുതൽ 20 വരെ ചോദ്യങ്ങൾക്ക് നിർദ്ദേശമനുസരിച്ച് ഉത്തരമെഴുതുക. 3 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ പരമാവധി ലഭിക്കാവുന്ന സ്കോർ 12.** **(3 × 4 = 12)**

(13) उदाहरणानुसारं वाक्यानि परिवर्तयत ।

उदा. – छात्राः पठन्तु । छात्राः पठन्ति ।

(1) मानवाः स्तुवन्तु । __________ ।

(2) खलाः निन्दन्तु । __________ ।

(3) जनाः गच्छन्तु । __________ ।

(14) 'क' विभागे प्रदत्तम् आशयं पठित्वा तदाशयप्रतिपादकं श्लोकं 'ख' विभागादुद्धृत्य लिखत ।

| | क | ख |
|---|---|---|
| (1) | दुर्जनानां सज्जनानां च मैत्री विभिन्ना । | निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् । अद्यैव वा मरणमस्तु युगान्तरे वा न्यायात् पथः प्रविचलन्ति पदं न धीराः । |
| (2) | धीराः न्यायात् मार्गात् पदं न प्रविचलन्ति । | साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः । तृणं न खादन्नपि जीवमान-स्तद्भागधेयं परमं पशूनाम् ।। |
| (3) | साहित्यसङ्गीतकलाविहीनः जनः साक्षात् पशुः भवति । | आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् । दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् । |

(15) पेटिकातः पदान्युपयुज्य रिक्तस्थानानि पूरयत ।

| |
|---|
| सर्वमपि, सक्रोधं, न जाने निषादोऽहम् |

- रत्नाकरो नाम ________ ।
- तदहं ________ ।
- ________ प्रयच्छत ।

(16) प्रदत्तस्य श्लोकस्य आशयं स्ववाक्यैः विशदयत ।

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ।।

(17) कोष्ठके प्रदत्तेभ्यः पदेभ्यः क्त्वान्त-ल्यबन्त-तुमुन्नन्त पदानि विविच्य लिखत ।

(श्रुत्वा, भयङ्करः, आरुह्य, गन्तुं, अत्रैव)

क्त्वान्तम् - ________ ।

ल्यबन्तम् - ________ ।

तुमुन्नन्तम् - ________ ।

(18) कोष्ठकात् संख्यावाचकपदानि उपयुज्य वाक्यानि पुनर्लिखत ।

(अष्ट, चतुर्दश, पञ्च, नव)

- ___9___ रसाः सन्ति ।
- श्रोत्र-त्वक्-चक्षु-रसना-नासिक इत्येतानि ___5___ इन्द्रियाणि सन्ति ।
- ___14___ माहेश्वरसूत्राणि सन्ति ।

(19) अलङ्कारम् उदाहरणञ्च यथोचितं योजयत ।

| अलल्ङ्कार | उदाहरणानि |
|---|---|
| • वस्तूत्प्रेक्षा | हंसीव कृष्ण ! ते कीर्तिः स्वर्गङ्गामवगाहते । |
| • उपमा | धूमस्तोमं तमश्शङ्के कोकीविरहशुष्मणाम् । |
| • हेतूत्प्रेक्षा | रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद् ध्रुवम् । |

(20) पेटिकातः पदान्युपयुज्य वृत्तलक्षणं पूरयत ।

| |
|---|
| वसन्ततिलका |
| वंशस्थम् |
| उपेन्द्रवज्रा |

- जतौ तु ________ उदीरितं जरौ ।
- ________ जतजास्ततो गौ ।
- उक्ता ________ तभजा जगौगः ।

**V. 21 – 24 प्रश्नानां निर्देशानुसारम् उत्तराणि लिखत । एकैकस्य चत्वारि अङ्काः । अस्य विभागस्य अधिकाधिकम् अष्ट अङ्काः एव ।**

**21 മുതൽ 24 വരെയുള്ള ചോദ്യങ്ങൾക്ക് നിർദ്ദേശമാനുസരിച്ച് ഉത്തരം എഴുതുക. 4 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ നിന്ന് ലഭിക്കാവുന്ന പരമാവധി സ്കോർ 8. (2 × 4 = 8)**

(21) अधः प्रदत्तयोः **एकस्य** सुभाषितस्य आशयं लिखत ।

- साहित्यसङ्गीतकलाविहीनः
  साक्षात्पशुः पुच्छविषाणहीनः ।
  तृणं न खादन्नपि जीवमान –
  स्तद्भागधेयं परमं पशूनाम् ।

DITTO WS

- भवन्ति नम्रास्तरवः फलागमै –
  र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
  अनुद्धताः सत्पुरुषाः समृद्धिभिः
  स्वभाव एवैष परोपकारिणाम् ।।

(22) अधोरेखाङ्कितपदानां स्थाने समानार्थकपदानि कोष्ठकादुद्धृत्य खण्डिकां पुनर्लिखत ।

(स्तब्धाः, सकलं, वनमध्यात्, अपहरिष्याम्यहम्)

"तिष्ठत तत्रैव तिष्ठत । भवदीयं सर्वं प्रयच्छत । नो चेत् प्राणान् हरिष्याम्यहम्" । काननमध्यात् कर्णकठोरं गर्जनं श्रुत्वा सप्तर्षयः चकिताः अभवन् ।

(23) अधः प्रदत्तं गद्यांशं पठित्वा वसिष्ठरत्नाकरयोः मिथः संभाषणे रिक्तस्थानानि पूरयत ।

तीक्ष्णं रक्तपङ्किलं खड्गं प्रसार्य रत्नाकरो नाम निषादः महर्षीणां पुरतः आपतत् । सः उच्चैः आक्रोशत् – "सर्वमपि प्रयच्छत्" । तदा भीतः वसिष्ठः "भवान् कः" इति अपृच्छत् । तदा निषादः – मम नाम रत्नाकरः इति प्रत्यवदत् । त्वं किमर्थं एवं धनापहरणं करोषि इति वसिष्ठः अपृच्छत् । तदा रत्नाकरः क्रोधेन अवदत् – मम कुटुम्बपालनार्थं अहं धनापहरणं करोमि ।" तव कलत्रपुत्रादयः अस्य पापस्य फलभाजः किं ?" इति यदा वसिष्ठः अपृच्छत् तदा "तदहं न जाने" इति निषादः प्रत्यवदत् । शान्तः भूत्वा वसिष्ठः –

"रत्नाकर; भवान् गहं गत्वा भार्यादीन् पृच्छतु" इत्यवदत् ।

रत्नाकरः – सर्वमपि प्रयच्छत ।

वसिष्ठः – __________ कः ?

रत्नाकरः – मम नाम रत्नाकरः ।

वसिष्ठः – __________

रत्नाकरः – __________ मम कुटुम्बपालनार्थम् ।

वसिष्ठः – __________ ।

रत्नाकरः – __________ ।

(24) अधः प्रदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत ।

अकृत्वा शत्रुसंहारम्
अगत्वाखिलभूश्रियम् ।
राजाहमिति शब्दान्नो
राजा भवितुमर्हति ।।

शत्रुसंहारम् _______ अखिलभूश्रियम् ______ अहं ____ इति शब्दात् राजा नो _______ अर्हति ।

**VI. 25-30 प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत । एकैकस्य पञ्च अङ्काः । अस्य विभागस्य अधिकाधिकं 15 अङ्काः ।**

**25 മുതൽ 30 വരെയുള്ള ചോദ്യങ്ങൾക്ക് നിർദ്ദേശമാനുസരിച്ച് ഉത്തരം എഴുതുക. 5 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ നിന്നും ലഭിക്കാവുന്ന പരമാവധി സ്കോർ 15. (3 × 5 = 15)**

(25) यथोचितं योजयत ।

| क | ख |
|---|---|
| • दिनम् | वृक्षाः |
| • अम्बु | अहः |
| • खलः | जलम् |
| • घनाः | दुर्जनः |
| • तरवः | मेघाः |

(26) श्लोकं पठित्वा अधः प्रदत्तानां प्रश्नानामुत्तराणि लिखत ।

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।।

(क) कैः विघ्नभयेन न प्रारभ्यते ?

(ख) मध्याः विघ्नविहताः किं कुर्वन्ति ?

(ग) श्लोके श्रेष्ठाः इत्यर्थे प्रयुक्तं पदं किम् ?

(घ) श्लोकस्य आशयं स्ववाक्यैः लिखत ।

DITTO WS

(27) अधः प्रदत्तं गद्यभागं पठित्वा प्रश्नानामुत्तराणि लिखत ।

एकदा सप्तर्षयः वनमार्गेण गच्छन्नासीत् । तदा ते "तिष्ठत तत्रैव तिष्ठत । भवदीयं सर्वं प्रयच्छत । नो चेत् प्राणान् हरिष्याम्यहम्" इति गर्जनं अशृण्वन् । गर्जनं श्रुत्वा सप्तर्षयः चकिताः अभवन् । झटिति रक्तपङ्किलं खड्गं प्रसार्य भयङ्करः कश्चन निषादः तेषां पुरतः आपतत् । "सर्वमपि प्रयच्छत" सः उच्चैशक्रोशत् ।

(क) के वनमार्गेण गच्छन्नासीत् ?

(ख) सप्तर्षयः किं अशृण्वन् ?

(ग) गर्जनं श्रुत्वा सप्तर्षयः कथम् अभवन् ?

(घ) 'सर्वमपि प्रयच्छत' इति कः आक्रोशत् ?

(ङ) खण्डिकायाः एकं शीर्षकं लिखत ?

(28) माहेश्वरसूत्राणि क्रमीकुरुत ।

एओङ् । ॠलृक् । ऐऔच् । अइउण् । हयवरट् ।।

(29) अधः प्रदत्तेषु नाटकसङ्केतेषु एकम् अधिकृत्य सोदाहरणं टिप्पणीं लिखत ।

- आत्मगतम् ।
- नेपथ्यम् ।
- प्रकाशम् ।

(30) "भावैकरसं मनः" इति पाठमधिकृत्य सूचनानुसारं लघुटिप्पणीं लिखत ।

**सूचना** :- पञ्चमहाकाव्यम्, कुमारसंभवम्, कालिदासः, ब्रह्मचारीरूपेण शिवस्य आगमनम्, ब्रह्मचारीकृतशिवनिन्दा, पार्वत्याः प्रतिवचनानि ।

**VII. 31-40 प्रश्नानां निर्देशानुसारम् उत्तराणि लिखत । एकैकस्य पञ्च अङ्काः । अस्य विभागस्य अधिकाधिकं त्रिंशत् (25) अङ्काः ।**

**31 മുതൽ 40 വരെ ചോദ്യങ്ങൾക്ക് നിർദ്ദേശം അനുസരിച്ച് ഉത്തരമെഴുതുക. 5 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ പരമാവധി ലഭിക്കാവുന്ന സ്കോർ 25.** **(5 × 5 = 25)**

(31) इष्टतमं सुभाषितं चित्वा सकारणं विशदयत ।

(क) भवन्ति नम्रास्तरवः फलागमै –
नेवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ।।

DITTO WS

(ख) साहित्यसङ्गीतकलाविहीनः

साक्षात्पशुः पुच्छविषाणहीनः ।

तृणं न खादन्नपि जीवमान –

स्तद्भागधेयं परमं पशूनाम् ।।

(32) संस्कृतभाषया अनुवदत्त ।

(1) സുഭാഷിതങ്ങൾ മനോഹരങ്ങളാണ്.

(Subhashithas are beautiful.)

(2) വൃക്ഷങ്ങൾ മറ്റുള്ളവർക്ക് ഉപകാരപ്രദങ്ങളാണ്.

(Trees are helpful to others.)

(3) സംസ്കൃതം ഒരു ശ്രേഷ്ഠഭാഷയാകുന്നു.

(Sanskrit is a Classical Language.)

(33) कथास्ततंभं क्रमीकुरुत ।

- वत्सेति संबोधनया निषादस्य मनः आर्द्रमभवत् ।
- भार्यायाः प्रतिवचनं निशम्य निषादः खिन्नः अभवत् ।
- पश्चात्तापविवशः मुनीनां पुरतः अतिष्ठत् ।
- पापफलं कलत्रपुत्रादयः अनुभवन्ति वा इति मुनिरपृच्छत् ।
- वाल्मीके, उत्तिष्ठा सिद्धोऽसि इति वसिष्ठः अवदत् ।
- खड्गं प्रसार्य कश्चन निषादः आपतत् ।

(34) अधः प्रदत्तं गद्यभागं संगृह्य लिखत ।

अतीतेषु बहुषु संवत्सरेषु तेनैव मार्गेण प्रत्यागताः ते महर्षयः वनमध्यात् मधुरमनोहरं राममन्त्रमाकर्ण्य विस्मिताः अभवन् ।

मन्त्रध्वनेः प्रभवस्थानम् एकं वल्मीकमिति ज्ञात्वा ते ऋषयः तदभञ्जयन् । तदा ते अतितेजस्विनम् एकं मुनिश्रेष्ठम् अपश्यन् । तदा ते "वल्मीके उत्तिष्ठ सिद्धोऽसि" इत्यवदन् ।

निषादत्वात् ऋषित्वं प्राप्तस्य तस्य पुरतः ऋषयः साष्टाङ्गं प्राणमन् । अथ सः वाल्मीकिः तमसातीरे वासमारभत ।

DITTO WS

(35) 'क' विभागे 'ख' विभागे च प्रदत्तान् श्लोकांशान् योजयित्वा श्लोकान् पूर्णरूपेण लिखत ।

| 'क' | 'ख' |
|---|---|
| (1) विशिखा ! निशिता विरम्यतां क्षतमेयात् स्तिमितं न मे मनः । | • स्वमहांस्युपदर्शयन्ति नः शुभताराः भवतीर्नमामि ताः ।। |
| (2) इयमस्तु नतिर्ममान्तिमा दिनसाम्राज्यपते ! दिवस्पते ! । | • कनकांशुशरौघधारिणे भवते दुष्प्रसहप्रदीप्तये ।। |
| (3) निजगाः प्रविचार्य दूरतो गहनं सन्तमसं विदार्य याः । | • पुरतो भ्रम लोकचक्र ! मां त्यज सीतामिह तां हतामहो ।। |

(36) श्लोकं पठित्वा ततः त्रीणि संबोधनाप्रथमा रूपाणि चित्वा लिखत ।

सुसिताम्बर ! वन्द्य ! वृद्ध ! भो !
बिसिनीतन्तुमरीचिकैशिक !
लसितस्मित ! चारुचन्द्रिका –
भसितस्नात ! मृगाङ्कः । ते नमः ।।

(37) उचित संख्यावाचकपदान्युपयुज्य रिक्तस्थानानि पूरयत ।

| | |
|---|---|
| 1. _______ | 2. द्वे |
| 3. _______ | 4. चत्वारि |
| 5. पञ्च | 6. _______ |
| 7. सप्त | 8. _______ |
| 9. _______ | 10. दश |
| 11. _______ | |

(38) 'तत्वामृतबिन्दवः' इति पाठाधारेण सूचनानुसारं श्री शङ्कराचार्यमधिकृत्य लघुटिप्पणीं लिखत ।

**सूचनाः** – श्री शङ्कराचार्यस्य जन्म, मातापितरौ, देशः, अद्वैतमतप्रचारणं, विवेकचूडामणिः, इन्द्रियनिग्रहः, दुःखनिवृत्तिः, पञ्चेन्द्रियैरलङ्कृतः नरः ।

(39) गद्यांशं पठित्वा ततः सूक्तीनुद्धृत्य लिखत ।

एवं चिन्तानिरतेषु तेषु तन्मार्गेण कस्याचित् मृतस्य वणिक्पुत्रस्य दाहाय महाजनो गच्छन्नवर्तत । जनान् वीक्ष्य चतुर्णां मध्ये एकेन पुस्तकमवलोकितं कथितश्च – "महाजनो येन गतः स पन्थाः" । तस्मात् तेन मार्गेणैव गच्छामः । महाजनमनुसरन्तस्ते एकं श्मशानं प्रापुः । अये ! गर्दभमेकं पश्य इत्युक्त्वा द्वितीयः पुस्तकमवलोक्य उक्तवांश्च – "उत्सवे व्यसने चैव दुर्भिक्षे शत्रुसङ्कटे राजद्वारे श्मशाने च । यस्तिष्ठति स बान्धवः ।" अयमस्माकं बन्धुरिति निश्चित्य ते तमपूजयन् । अथ पितृवनं परितः अवलोक्य तत्रैकं त्वरितं गच्छन्तम् उष्ट्रं दृष्ट्वा विस्मिताः अभवन् । तृतीयस्तु पुस्तकं परामृश्य "धर्मस्य त्वरिता गतिः" इति पठन् –

अतोऽयमेव धर्म इत्यवदन् ।

(40) अधः प्रदत्तं गद्यांशं मलयालभाषया आङ्गलभाषया वा अनुवदत ।

स्वामी विवेकानन्दः विश्वयुवकानाम् आदर्शभूतः यतिकेसरी आसीत् । सः 1863 तमे वर्षे कोल्कोत्ता देशे जनुवरिमासस्य 12 तमे दिने जनिमलभत । तस्य जन्मदिनं युवजनदिनत्वेन लोके सर्वत्र आघुष्यते । विवेकानन्दः श्रीरामकृष्णपरमहंसस्य शिष्यः आसीत् । सः चिक्कागो नगरे प्रचलिते विश्वधर्मसमारोहे भागमभजत् ।

**VIII. 41-42 प्रश्नान् निर्देशानुसारं उत्तरयत । एकैकस्य अष्ट अङ्काः । अस्य विभागस्य अधिकाधिकं अष्ट अङ्काः ।**

**41 മുതൽ 42 വരെ ചോദ്യങ്ങൾക്ക് നിർദ്ദേശമാനുസരിച്ച് ഉത്തരം എഴുതുക. 8 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ പരമാവധി സ്കോർ 8. (1 × 8 = 8)**

(41) 'पुरतोभ्रम लोकचक्र' इति पाठाधारेण सूचनानुसारं सीतायाः विचारधाराः अधिकृत्य विशदयत ।

**सूचना :-** चिन्ताविष्टयाय सीता, श्री कुमारनाशान् महोदयः, आधुनिककवित्रयेष्वन्यतमः, सीताविचारलहरी (संस्कृतानुवादः) श्री एन् गोपालपिल्ला महोदयः, सीतायाः आमन्त्रणवचांसि, जीवने अनुभूतानि दुःखानि, सूर्य–चन्द्र–नक्षत्र–सन्ध्यादीन् प्रति प्रणामवचनानि ।

(42) समयवाचकपदान्युपयुज्य दिनचर्याक्रमं पूरयत ।

रामकृष्णः प्रभाते (4) ______ वादने उत्तिष्ठति । अनन्तरं (4 : 15) ______ वादने सः दन्तधावनं करोति । शौचाद्यनन्तरं (4 : 30) ______ वादने सः स्नानं करोति । पुनः सः प्राणायामं ध्यानं च करोति । सः (5 : 15) ______ वादनतः (6) ______ वादनपर्यन्तं स्वाध्यायं करोति । (7) ______ वादने प्रभातभोजनं कृत्वा (7 : 30) ______ वादने विद्यालयगमनाय सन्नद्धः भवति । (8) ______ वादने यानेन विद्यालयं गच्छति । सायं (4 : 30) ______ वादने सः गृहं प्रतिगच्छति ।